दुरुक्तार्थव्यक्तकारि तु वार्त्तिकम्" इत्युक्ते सूत्रानुक्ता-द्यर्थाविष्कारके १ग्रन्थभेदे हेमच०। वार्त्तायां तद्वहणे नियुक्तः ठक्। २चरे त्रि०। वृत्तिः कृष्यादिः प्रयोजनमस्य ठञ्। ३वैश्ये ४वर्त्तिकाखगे पुंस्त्री० स्त्रियां ङीष्। राजनि० ५वार्त्ताकौ शब्दर०। ६खगभेदे (बटेर) स्त्री हारा०।

**वार्द्दर** न० वारि जलाय दीर्य्यते दृ-अप्। १दक्षिणावर्त्त-शङ्खे २काकचिञ्चायाम् ३कृष्णजावीजे ४भारत्यां मेदि० ५कृमिजे ६आम्रबीजे च। वारेव दरम्। ७जले च विश्वः।

**वार्द्दल** न० वार्दलात्यत्र दल—आधारे क। १दुर्दिने २मस्याधारे पु० मेदि०।

**वार्द्धक** न० वृद्धानां समूहः तस्य भावः कर्म वा वुञ्। १वृद्धसमूहे वृद्धस्य २भावे ३कर्मणि च मेदि०।

**वार्द्धक्य** न० वृद्धस्य भावः कर्म वा ष्यञ् कुक् च। वृद्धत्वे अमरः। [त्रिका०।

**वार्द्धि** पु० वारि जलानि धीयन्तेऽत्र धा-कि उप०। समुद्रे

**वार्द्धिभव** न० वार्द्धौ समुद्रे भवति भू-अच्। समुद्रलवणे राजनि०। २समुद्रभवमात्रे त्रि०।

**वार्द्धुषि** पु० वृद्ध्या जीवति इण् वृद्धेर्द्धुषिभावः। वृद्ध्याजीवे अमरः। स्वार्थे क तत्रैव। "समार्घं धान्यमादाय महार्घं यः प्रयच्छति। स वै वार्द्धुषिको नाम हव्यकव्यवहिष्कृतः" स्मृतिः। वृद्धिश्च वृद्धिशब्दे वक्ष्यते तत्रोक्तनियमातिक्रमेण अनापदि स्वयमन्यद्वारा वा स्वाच्छन्द्येन यो व्यवहरति तस्यैव प्रायश्चित्तम् आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः" प्रा० वि०।

**वार्द्धुषिन्** त्रि० वृद्धि+अस्त्यर्थे इनि प्रकृतेः नि० वार्धुषिभावः। वृद्ध्याजीविनि भा० अनु० ४८२६ श्लो०।

**वार्द्धुष्य** न० वार्द्धुषेर्भावः ष्यञ्। धान्यादेर्वर्द्धनोपाये (वाड़ि देया) त्रिका०।

**वार्द्धीनस** पुंस्त्री० वारि जलानि धयति धा-क्विप् वार्द्धीः नासा नासिका यस्य नसादेशः। १गण्डके त्रिका० स्त्रियां ङीष्। "त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्। वार्द्धीनसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्तमः" इत्युक्ते २छागभेदे "वार्द्धीनसस्य मांसेन तृप्तिर्द्वादशवार्षिकी" मनुः। ३पक्षिभेदे च "रक्तपादो रक्तशिरा रक्तचञ्चुर्विहङ्गमः। कृष्णो वर्णेन च तथा पक्षी वार्द्धीनसो मतः" मार्क०पु० अयं श्राद्धाङ्गम्। वलिदानाङ्गं कालिकापु० ६६अ० उक्तो यथा "नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः। वार्द्धीनसः स्यात् पक्षीशो मम विष्णोरतिप्रियः"। पृषो० वार्ध्रीणसोऽप्यत्र।

**वार्भट** पुंस्त्री० वारि भट इव कुम्भीरे त्रिका० स्त्रियां ङीष्।

**वार्म्मण** न० वर्म्मणां समूहः अण् न टिलोपः। कवचसमूहे अमरः। [समूहे शब्दर०।

**वार्म्मिण** न० वर्म्मिणां समूहः अण् न टिलोपः। कवचि-

**वार्मुच्** पु० वारि जलानि मुञ्चति मुच-क्विप्। १मेघे शब्दर० २मुस्तके च।

**वार्शिला** स्त्री वाजाता शिला शाक०। करकायां शब्दच०।

**वार्षक** न० पृथिवीभागभेदे। "दशधा विभजन् क्षेत्रमकरोत् पृथिवीमिमाम्। इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान्। कोष्टवे वार्षकं क्षेत्रं रणाद्दिष्टैर्बभूव ह" अग्निपु०।

**वार्षिक** त्रि० वर्षे वर्षासु वा भवः ठञ्। १वत्सरभवे २वर्षाकालभवे च। ३त्रायमाणलतायां न० मेदि० तत्रार्थे स्त्री राजनि० स्त्रीत्वे ङीप्। ४वर्षे वर्षे कर्त्तव्यायां पूजायां स्त्री ङीप्। "शरत्काले महापूजा क्रियते या च वार्षिकी" देवीमा०। [अमरः।

**वार्हत** न० वृहत्याः फलम् अण् तस्य न लुप्। वृहतीफले

**वार्हद्रथ(थि)** पु० वृहद्रथस्यापत्यमण् इञ् वा। वृहद्रथराजपुत्रे जरासन्धे नृपे त्रिका० अणन्तः शब्दर०।

**वार्हस्पत्य** न० वृहस्पतिना प्रोक्तमधीते पत्यन्तत्वात् यक्। १चार्वाके रत्नमा०। तेन प्रोक्तं तस्येदं वा यक्। २नीतिशास्त्रे ३बौद्धागमे च। ४वृहस्पतिसम्बन्धिनि त्रि०। ५वर्षभेदे गुरुवर्षशब्दे २६१८पृ० दृश्यम् स देवताऽस्य यक्। ६तद्देवताके त्रि० ७पुष्यनक्षत्रे न० शैषिकोऽण्। वार्हस्पत तत्सम्बन्धिनि त्रि० स्त्रियां ङीप्।

**वालव** पु० वल-घञ् वालश्चलनं याति गच्छति वा-क। तिथ्यर्द्धात्मके द्वितीये करणे ज्यो०त०। [वल्कल अस्य न०

**वाल्क** न० वल्केन निर्वृत्तमण्। वल्कजातेवस्त्रे। वा-

**वाल्मिकि** पु० वल्मीके भवः इञ् पृषो०। रामायणग्रन्थकर्त्तरि मुनिभेदे द्विरूपको०।

**वाल्मीक(कि)** पु० वल्मीके भवः अण् इञ् वा। भार्गवे प्राचेतसे मुनिभेदे जटा०। [अमरः।

**वावदूक** त्रि० वद-यङ् लुक्—ऊकञ्। बहुवदनशीले वक्तरि

**वावय** पु० वय-यङ्लुक्-अच्। (बाबुइ) तुलसीभेदे शब्दच०

**वावृत** संभक्तौ दि० आत्म० सक० सेट् क्त्वा वेट्। वावृत्यते अवावर्त्तिष्ट। "ततो वावृत्यमाना सा" भट्टिः।

**वावृत्त** त्रि० वावृत-क्त। वृतवरणे।